**दिनाङ्क :-08.02.2025** **प्रात: - 06:55**

**इयम् आकाशवाणी**

**सम्प्रति वार्ता: श्रूयन्ताम्**

**प्रवाचक: – पुनीतत्रिपाठी**

## अथ वार्ता:

### दिल्ली-विधानसभा

दिल्लीनिर्वाचनमतगणना अद्य भविष्यति। दिल्लीविधानसभानिर्वाचनस्य मतगणनायाः सर्वा: सज्जा: परिपूरिता: । मतदानस्य गणना प्रातः अष्टवादनत: आरभ्यते, मध्याह्न द्वादश वादनपर्यन्तं परिणामः अपेक्षितः अस्ति। प्रथमं डाकमतपत्राणां गणना भविष्यति, तदनन्तरं ईवीएम यन्त्राणां गणना भविष्यति। दिल्लीप्रदेशस्य मुख्यनिर्वाचनाधिकारी आर. ऐलिस वाज इत्यनेन उक्तं यत्, दिल्लीप्रदेशे एकादश जनपदेषु गणनाप्रक्रियायाः कृते नवदशगणनाकेन्द्राणि स्थापितानि सन्ति। अस्य कृते प्रायः पञ्चसहस्राणि कर्मचारिणः अन्ये च सहायककर्मचारिणः नियोजिताः प्रशिक्षिताः च सन्ति । निर्वाचनायोगेन स्वस्य अन्तर्जाल www.eci.gov.in इत्यस्य माध्यमेन प्रवृत्तीनां परिणामानां च प्रसारार्थं सुदृढं, पूर्णतया सुरक्षितं च आधारभूतसंरचनं निर्मितम् अस्ति। गणनाकेन्द्रेषु त्रिस्तरीयसुरक्षाव्यवस्था कृता अस्ति। आयोगस्य, आरक्ष्याधिकारिणां च नित्यनिरीक्षणे सशक्तकक्षेषु ईवीएम- मतदानयन्त्राणि अपि स्थापितानि सन्ति।

### मन्त्रिमण्डलस्य विवरणम् :

प्रशासनेन स्किल इण्डिया कार्यक्रमस्य कृते त्रयोविंशत्यधिक द्विसहस्र तः षड्विंशत्यधिक द्विसहस्र पर्यन्तं अष्टशतोत्तर अष्टसहस्र कोटिरूप्यकाणि सर्वकारेण अनुमोदितानि। ह्यः नवदिल्ल्यां वार्ताहरान् संबोधयन् सूचनाप्रसारणमन्त्री अश्विनीवैष्णवः अवदत् यत् सम्प्रति प्रशासनं कौशलविकासे केन्द्रितम् अस्ति, अभिसरणस्य गुणवत्ताप्रवर्धनस्य च विषये बलं प्रदीयते।

### प्रधानमन्त्री-यात्रा

प्रधानमन्त्री नरेन्द्रमोदी सोमवासरे फ्रांसदेशस्य त्रिदिवसीययात्रायै प्रस्थास्यति। अस्मिन् यात्राकाले मोदीमहोदयः पेरिसनगरे फ्रांसदेशस्य राष्ट्रपतिना इमैनुएल मैक्रों इत्यनेन सह आर्टिफिसियल इंटेलिजेंस शिखर सम्मेलनस्य सह-अध्यक्षतां विधास्यति। विदेशसचिवः विक्रममिस्री ह्यः नवदिल्ल्यां एतां सूचनां दत्तवान्। सः अवदत् यत् प्रधानमन्त्री अमेरिकीराष्ट्रपतिना डोनाल्ड ट्रम्पेन सह द्विपक्षीय-गोष्ठीयाम् अपि अस्मिन् मासे द्वादश, त्रयोदश दिनाङ्केषु अमेरिकादेशं प्रति गमिष्यति।

**बाङ्गलादेशी आप्रवासिनः गृहीताः-**

मुम्बईनगरे ह्यः चतसृभिः महिलाभिः सह सप्त बाङ्गलादेशीयाः नागरिकाः निगडिताः। आरक्षी बलानुसारं ते प्रायः पञ्चवर्षेभ्यः चेम्बूर-नगरस्य माहुल्-क्षेत्रे निवसन्तः आसन्।

**जम्मू-कश्मीरस्य लाल-द्रमन शीतकालीन महोत्सवस्य**

जम्मू-कश्मीरस्य डोडा मण्डल प्रशासनम् अद्य पञ्चविंशत्यधिक द्विसहस्र तम वर्षस्य लाल-द्रमन इति शीतकालीन महोत्सवस्य आयोजनं करिष्यति। अस्य कार्यक्रमस्य आयोजनं मण्डलप्रशासनेन पर्यटनविभागस्य सेनायाः तेजस एक पहल फाउण्डेशन इत्यस्य च सहयोगेन क्रियते। महोत्सवस्य आरम्भः राष्ट्रगानेन समं भविष्यति, तदनन्तरं सांस्कृतिकप्रदर्शनानां श्रृङ्खला भविष्यति। आयोजनस्यास्य जीवन्ततां वर्धयितुं राष्ट्रिय ध्वजेन सह पथ प्रदर्शनम् अपि भविष्यति।

**टेनिस्-मुम्बई :**

टेनिस्-क्रीडायां माया राजेश्वरन इत्येषा मुम्बईनगरे एल एण्ड टी मुम्बई ओपन-क्रीडायाः महिला-एकल-क्रीडायां उपांत्यचक्रे प्रविष्टवती। पञ्चदश वर्षीया माया प्रागुपान्त्यचक्रीय-क्रीडायां जापानदेशस्य मेइ यामागुची इत्यमुं पराजितवती।

**॥ इति वार्ता:॥**